Total Pages—7 **PG/IVS/SAN/401(A, B, C)/24 (New)**

# M.A. 4th Semester Examination, 2024

## SANSKRIT

PAPER—SAN-401(A, B, C)(New)

*Full Marks* : 50

*Time* : 2 hours

Answer **all** questions

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

## GROUP – A

(*Literature*)

**सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः**

**क—विभागः**

**1.** एकः प्रश्नः समाधेयः— 10×1

(क) स्वभावोक्त्यलंकारविषये कुन्तकस्य किम् अभिमतमिति सविस्तरमालोच्यताम् ।

( Turn Over )

(*ख*) काव्यस्वरूपं सम्यक्प्रकारेण आलोच्यताम् ।

**2.** द्वयोर्व्याख्या कार्या — 5 × 2

(*क*) व्यवहारपरिस्पन्द्रसौन्दर्यं व्यवहारिभिः ।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते ।।

(*ख*) साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ।।

(*ग*) शरीरं चेदलंकारः किमलंकुरूतेऽपरम् ।
आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोदृति ।

## ख –विभागः

**3.** एक प्रश्न समाधेयः — 10×1

(*क*) का नाम प्रतिभा ? सा कतिविधा ? तासां स्वरूपं राजशेखरानुसारं व्याख्यायताम् ।

(*ख*) काव्यमीमांसाकारेण कवीनां कति भेदा अङ्गीकृताः ? तत्र को वा रसकविः ? कविविभागेषु कोऽवरः ? सोदाहरणम् आलोच्यताम् ।

4. द्वयोर्व्याख्या कार्या – 5×2

(क) सा हि बुद्धिविकाशकामधेनुः ।

(ख) आहार्यबुद्धेस्तु द्वयमप्रतिपत्तिः सन्देहश्च ।

(ग) सततमभ्यासवशतः सुकवेः वाक्यं पाकमायाति ।

[ **Internal Assessment – 10 Marks** ]

## GROUP – B

*(Vyakarana)*

**सर्वे प्रश्नाः** संस्कृतेन देवनागर्य्या च समाधेयाः

**क–विभागः**

1. एकः प्रश्नः समाधेयः – 10×1

(क) वाक्यपदीयम् इत्यस्य का तावद् व्युत्पत्तिः ? तत्र प्रथमकाण्डे व्याकरणमाहात्म्यं यत्कीर्तितं तदालोच्यताम् ।

(*ख*) वाक्यपदीयस्य कर्ता कः ? तत्र कति काण्डानि सन्ति ? तेषां नामानि उल्लिख्य शब्दार्थसम्बन्धविषये वाक्यपदीयकारस्य मतमालोच्यताम् ।

**2.** यथेच्छं कारिकाद्वयं व्याख्येयम् — 5 × 2

(*क*) एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥

(*ख*) प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ॥

(*ग*) अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणा ।
अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः ॥

## ख–विभागः

**3.** एक प्रश्न समाधेयः — 10 × 1

(*क*) सारमञ्जरी कस्य कृतिः ? तदनुसारं लकाराणां शक्तिनिरूपणं कार्यम् ।

(*ख*) सारमञ्जरीदिशा प्रत्ययार्थनिरूपणं सोदाहरणं करणीयम् ।

4. यथेच्छं प्रश्नद्वयं समाधेयम्— 5×2

(क) सारमञ्जर्या मङ्गलश्लोकं विलिख्य व्याख्यायताम् ।

(ख) वर्तमानप्रागभावप्रतियोगित्वं भविष्यत्त्वम्— व्याख्येयम् ।

(ग) चैत्रस्तण्डुलं पचति, घटमानय इत्यनयोः शाब्दबोधप्रकारं प्रदर्श्य महावाक्यार्थः सारमञ्जर्यनुसारं निरूपणीयः ।

**[ Internal Assessment — 10 Marks ]**

## GROUP — C

*(Indian Philosophy)*

**सर्वे प्रश्नाः संस्कृतेन देवनागरीलिप्या समाधेयाः**

1. यथानिर्देशं समाधेयम्— 10×2

(क) चार्वाकैः कतिविधं प्रमाणं स्वीकृतम् ? अन्येषां प्रमाणानां निराकरणे तेषां युक्तयः आलोच्यन्ताम् ।

*अथवा*

अर्हतः सार्वज्ञ्यसिद्धौ जैनानां युक्तयः आलोच्यन्ताम् ।

(*ख*) बौद्धैः कतिविधं प्रमाणं स्वीकृतम् ? कानि च तानि ? अनुमानस्य प्रामाण्यप्रतिष्ठायां तेषां काः युक्तयः ? चार्वाकैरपि अनुमानप्रमाणं स्वीकर्तव्यमिति कथं तैरभाणि— स्पष्टयत ।

*अथवा*

वस्तुनोऽस्थायित्वप्रतिष्ठायां बौद्धैः कीदृशं प्रमाणं स्वीकृतम् ? बौद्धसम्मतः क्षणिकत्ववादः सयुक्ति आलोच्यताम् ।

**2.** टीकाचतुष्टयं लेख्यम् — 5 × 4

(*क*) भूतचैतन्यवादः

(*ख*) भूतचतुष्टयवादः

(ग) पञ्चकारणी

(घ) भावनाचतुष्टयम्

(ङ) रत्नत्रितयम्

(च) काशकुशावलम्बनन्यायः ।

**[ Internal Assessment – 10 Marks ]**

---